CC-0. Digitized by eGangotri and MIDF- Delhi

तामिकाभ्यांहुँ॥ॐ१२शोकतापहरःविनासनायकनिधिकाभ्यांवौषट॥ॐ१२लंकाप्रा
कारभंजनायप्रतिकूपेरे॥ॐ१२सर्वभयविनासनायेतिमणिबंधे॥ॐ१२व
ज्रशक्तित्रिशूलायकरतलकरपृष्ठाभ्यांफुट॥इतिकाम्याङ्गः॥अथष
डंगन्यासः॥ॐहृदयायनमः॥ॐह्रौंह्रीं क्लीं ब्लूं सौः शिरसेस्वाहा॥ॐह्रां ह्रीं क्रूं रामभद्रमनुतत्त्वाय
नमः॥ॐ१२रामभद्रोयेशिखायैवषट॥ॐ१२नमोरामायेतिकवचायहुँ॥ॐ१२सिताशोकविनासनायनेत्र
त्रयायवौषट॥ॐ१२लंकाप्राकारभंजनायपादाभ्यामस्त्रायफट॥ॐ

गृहवास्तुशान्ति प्रयोग

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

~~श्रीगणेशायनमः॥~~ ॥~~अथगरुत्वालुशान्तिप्रयोगः~~॥ ॥गरुत्प्रासादारंभेयजमानोसाध्यानुकूलेनक्ष
त्रवारेशोलग्नेयथोक्तंभूमीसमीक्षतत्रगत्वाकृतनित्यःकृत्वःधान्यापरिसवत्रहेमगर्भफलपुष्प
जलान्वितंकलशंतस्मिन्कलशेमेरुकरीकोपशोभितांक्षीरवननदीसमायुक्तांसागरवेष्टितांभूमीं
ध्यात्वा॥ ॥ॐ~~गरुडायनमः~~॥~~इतिमंत्रेणागंधादिभिरभ्यर्चः~~ पूर्वादिदिक्षुइन्द्रायनमः~~इतिदिक्पाल~~
नभ्यर्च~~सूर्य्यायनमः~~इत्यादिमंत्रेणाग्रहानभ्यर्च्यः॥ॐनागेभ्योनमः॥ॐयक्षादिदेवेभ्योनमः॥पू-
र्वादिदिक्षु॥ॐइन्द्रायसाङ्गायसपरिवाराय~~ससशस्त्रिकायसायुधायसवाहनायएवसदीपमाषभ-
क्तबलिनमः॥भोःऋषिरक्षबलिभक्षयमम~~यजमानस्य~~भायुःकर्त्तीक्षेमकर्त्तीशान्तिकर्त्तीपुष्टि
कर्त्तीतुष्टिकर्त्तीवरदोभव॥तथैवभार्य्यायाश्चनेत्रांत~~तः~~ॐभनःशंभवंतित्रिनेत्रायनमःइति॥यज्ञाग्र
तश्चितवद्ब्रह्मचंसप्तधाभाचार्य्यसत्रधारकश्चकशान्तरगोदायीन॥~~ततोनिशाशेषेजानेः~~ स्वप्नेभाश्च

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मफलेन्नात्वायजमानः सुस्नानादितः श्रीगणेशपूजापुरापाठवाचनवसोर्धारामातृकापूजनांश्च्युदयिकंकृ
र्य्यात्॥ततःज्ञाचार्य्यः यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्व्वदा॥स्थानंत्यक्त्वातुतत्सर्व्वंयत्रस्थंतत्रगछतु॥
अयक्रांतिभूतानिपिशाचासर्व्वतोदिशा॥सर्व्वेषामविरोधेनब्रह्मकर्म्मसमारभेत॥ॐमंत्रेणाङ्गर्म्मयान्
विकीर्य्यःपञ्चगव्येन अपवित्रःपवित्रोवासर्व्वावस्थांगतोपिवा॥यःस्मरेत्पुराडरीकाक्षंसवाह्याभ्यन्तरःश
चि॥गायत्रीमूलमंत्रेणपोक्ष्य॥गृहेवामराउपेवाचतुरङ्गुलंचतुरस्रमात्रंमराउलेईशानेकृत्वाग्रहान्यथोक्तवि
धिनाकृत्वा॥वालुमराउलेईशानादिचतुष्टयकोणेषुलोहकीलकान्मंत्रेण॥विशन्तुभूतलेनागालोकपाला
श्चसर्व्वेशः॥यस्मिन्गृहेवशंत्येतेआयुर्वलकरास्मृतेनिरवनेत्प्रतिकीलकंमंत्रान्नीत्वा॥ततःईशानादिक्र
मेणोर्ध्वचतुर्थकोणेषु॥अग्नेय्योथसर्व्वेभ्योयेचान्येतत्समाश्रिताः॥तेभ्योबलिंप्रयछामिपूजामोरक्षम
न्नमामितिमंत्रेणावाहनंकारीत्वा॥तत्रस्थंडिलोपरिवस्त्रेकुंकुमादिनाहमरोप्यछालोकया॥ॐशांता
येनमः१ॐयशोवत्यैनमः२ॐकान्तायैनमः३ॐविशालायैनमः४ॐप्राणावाहिन्यैनमः५ॐसत्यैनमः६ॐसुमत्यैनमः७ॐनन्दा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यैर्ॐसुभद्रायैनमः१ॐभद्रायैनमः२॥एभिरेवाभिर्मन्त्रैर्घोडशपद्मादायतारेखाः कार्याः॥ॐहिरण्यायै
नमः१ॐसुभगायैनमः२ॐलक्ष्म्यैनमः३ॐविभूत्यैनमः४ॐविमलायैनमः५ॐप्रियायैनमः६ॐजयायैनमः७ॐज्वालायैनमः८ॐ
विशोकायैनमः९ॐइडायैनमः१०॥दक्षिणोत्तरादिकुसंस्थाश्चकुलानारादशरेखाः कार्याः॥तासुपूजा॥ए
वमेकाशीतिपदमण्डलंसंपद्यते॥ततोवास्तुचक्रेविधिनाकाश्चिद्रेखाःसमान्यैपञ्चचत्वारिंशत्पदानि
अवशिष्यन्तेतेषुपदेषुशिखादिब्रह्मान्तंसपूज्यब्रह्मोत्तरेसुवर्णादिप्रतिमायांवास्तुवारुण॥वास्तोष्पतेइ
तिवशिष्टऋषिःभिक्षुरुद्रःवास्तोष्पतिर्देवतापूजनेविनियोगः॥वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशो अ
नमीवोभवानःखेयाः॥यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे॥१॥वास्तोष्पतेप्रतरणान
ऽएणोगयस्फानोगोभिरश्वेभिरिन्दो॥अजराऽसोसवीरयाऽमपितेवपुत्रान्प्रतिनन्नोजुषस्वसन्नोभव
द्विपदेसंचतुष्पदेखाः॥२॥वास्तोष्मयासपश्यतेसखीमहिरण्ययागातुमन्मा॥पाहिक्षेमउतयोगे
वरन्नोयूयंपातःस्वस्तिभिःसदानःखाः॥३॥अमीवहावास्तोष्पतेविश्वारूपाण्याविशन्॥सखासुशेवए

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धिनः स्वाहा ॥ ३ ॥ ॐ वास्तोष्पते ध्रुवास्थूणांसत्रंसोम्यागृहम् ॥ ध्रुवोमेत्रापुराश्वत्तीनामिन्द्रोमनीनांसखाला ॥ एभिर्मन्त्रैर्संपूज्य ततः ईशानादिकोणेषुचक्रादीन् पूर्वादिदिक्षुक्रमाद्दीश्चसंपूज्य ब्रह्मादिदश दिक्षु इन्द्रादीन्संपूज्य ॥ वास्तुईशाने कलशंसंस्थाप्यततः कृतेस्थण्डिलेवाग्निंसंस्थाप्य ॥ ततोहोमसं कल्पः ॥ ॐ तत्सत् अद्येत्यादि अमुकगोत्रोमुकशर्माआदित्यादिनवग्रहान् अमुकसंवत्सरेसमिद्भवो ज्यैः शिखिपर्जन्यजयन्तकुलिशायुधसूर्यसत्यभृशआकाशवायुपूषवितथगृहक्षतयम गंधर्वभृंगराजमृगपितृदौवारिकसुग्रीवपुष्पदन्तवरुणासुरशोषरोगाहिमुख्यभल्लाटसोमसर्पअदितिदितिआपसावित्रजयरुद्रअर्यमासवित्रविवस्वतविधाधिपमित्रराजयक्ष्मपृथ्वीधरआपवत्सब्रह्मणचरकीविदारिपूतनापापराक्षसीस्कंदअर्यमन्जृंभकपिलिपिंजयमहपत्रिपुरान्तकअग्निजिह्वकरालिकउग्रसेनडामरगंधमादनएकपादअहितेजकअग्निवेतालमहाकालपृथिधरईशभृंगियमनिर्ऋतिवरुणवायुकुबेर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ईशान॰ २ वत्सराग्र॰ अनन्त॰ प्रश्रयवतिलसमिराज्यपायसैः अमुकसंख्ययावास्तोष्यतिमीप्रणैर्द्वोमुकसं
ख्यापञ्चविंशैः नद्विजैर्वाय॰ स्थे॥ इतिसंपात्य॥ आज्यभागान्ते गृहहोमं कृत्वा॰ यवतिलसमिराज्यपायसैः हो
व्यादिदेवताभ्यः प्रत्येकं अष्टाविंशति अष्टोत्तरशतवारत्वात्तान्येवद्व्याणि अष्टोत्तरशतं जुहुयात्॰ तत्रहोमे॰ वा
स्तोष्यतेतिचत्वारोमन्त्राः एकैकेनमंत्रेणाष्टाविंशतिराहुतयः॰ इत्यष्टोत्तरशतं॥ एतेष्वनुमिवास्तोष्यतेध्रुवाय
णामितिपंचविंशतिपंचविंत्यानितद्विजानिचाहुतयः॰ ततःआचार्यः विसृष्टहोमशेषंसमापयेत्॥
यजमानस्तुलोकपालेभ्योग्रहदेवताभ्यश्चबलिंदत्वा॰ पूर्णाहुतीकृत्वा॰ शिख्यादिपंचचत्वारिंशद्देवताभ्यश्चेय
घृतमुक्तिकतन्नद्वेणावलिंदत्वातदभावेतदभावेपायसान्नलिंदत्वाशिख्यादिप्रीतयेकांचनद्विजेभ्यःव
स्त्रगोधनंचदद्यात्॥ ततः शान्तिकलशोदकेनाग्निवाग्निरभिषिक्तोयजमानः अग्निमग्नीक्षणंदत्वा॥
वायव्यादिपूर्वकंरक्षोघ्नपवमानमंत्रैर्गृहंसूत्रेणप्रदक्षिणंवेष्टयित्वा॥ समंताज्जलधारांदत्वा॰ मध्येन
वपेत्सुरूपांस्त्रीध्यात्वा॰ पृथिव्येनमः॥ शीतंपूजा॥ ॥सर्वदेवमयंवास्तुसर्वदेवमयंपरं॥ इतिपठित्वा॰

क्षीरधारां २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रहस्याग्नेयेआकाशप्रदेशजानुमात्रंगर्त्तंखात्वा·गोमयोपलिप्य भभंरत्नपुष्पाक्षतैरलंकृत्यसप्र·
बीजानिरुध्वोरनंवक्षिप्त्वानवंजलपूर्णंभृंकेकपुष्पंसंयुतंगधाद्यर्चितंकलशमादायजानुभ्यांगत्वा
तज्जलंगर्त्तेक्षिपेत्॥ॐनमोवरुणायेतिमंत्रेणाजलेसव्यप्रदक्षिणावर्त्तंपुष्पेचोर्ध्वमुखेभस्म॥त
तोपक्वमृत्पेठिकायांसप्तबीजेरुध्वोरनंशैवालंपुष्पाणिचक्षिप्त्वातूर्ष्णीघोषपूर्वंकस्थापितांहृयवा
लकपेतिमांआनीयपेटिकायांसंस्थाप्य·पेटिका निधायमंत्र॥पूजितोसिमहावालोहोमार्थेर्च
नैःअभैः॥घृतीरपाहिविश्वेशदेहिमेगृहजंसुखम्॥वालुपुरुषनमस्तेस्तुभूशय्याशिरतःप्र
भोः॥मगृहंधनधान्यादिसमृद्धंकुरुसर्वदेति॥ततोमृत्पेठिकांगर्त्तेसंस्थाप्य॥दौडेलसाग
रांश्चीयस्तावहसिमृद्धंनि॥तथामावरुकल्याणसंपत्सन्नतिभिःसहेतिसंप्राथ्यं·मृत्तागर्त्तंपूर
येत्॥मस्याधिकेऽधिकंफलं·साम्येसाम्यं·न्यूनेन्यूनं·गर्त्तोपरिगोमयेनालिप्य·गंधपुष्पाक्ष
तान्क्षिप्त्वाआचार्यंवल्लत्विजःसंपूज्यतेभ्योतेभ्योदक्षिणांदत्वा·ग्रहपीठवालुपीठदेवतास्संपूज्य॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वा·वि· ४ उत्तिष्ठबलमाप्नुयते॥ यांतुदेवगणाःसर्वेतिष्ठिवस्व·भूयसीदक्षिणा॥ कृत्वा·सुहृद्भिःसहभुंजीतः॥ ए
तच्चवास्तुपूजनंप्रतिसंवत्सरेकार्य्यं॥ अनेनविधिनायस्तुसंवत्सरंवसेत्॥ गृहेवायतमेकूर्य्यान्नस
दुःखमवाप्नुयात्॥ इतिवास्तुपूजा॥ ॥ अथप्रवेशः॥ स्वप्रथमेहिवास्तुशांतिंविधायद्वितीये
हिगृहप्रवेशनंकुर्य्यात्॥ सवेश्मनेवजलपूर्णं॥ पल्लवोपेतंदध्योपेतंसुधालिप्तंवस्त्रवेष्टितंसंपूर्णपा
त्रं·सफलंकलशंअंजलिनागृहीत्वायजमानोब्राह्मणान्वितः सदारपुत्रःनृत्यंघोषणागृहंप्रविश्य॥ प्र
धानगृहमध्ये·धान्योपरिकलशंस्थापयेत्॥ ततोगृहस्थेयोर्थपुण्याहंवाचयित्वा·ब्राह्मणान्भूम
भोजयित्वा·आशिषोगृहीत्वासुहृद्भोजंभुंजीत॥ इतिप्रवेशः॥ ॥ अथबलिदानम॥ ॥
ॐ शिखिनेःघृतोदनबलिनेमः॥ ॐ पर्जन्याय·सोत्पलघृतोदनं॥ ॐ [illegible]य·पीतध्वजपिष्ट॥
ॐ कुलिशायुधाय·सपंचरत्नपिष्टकुलिशं॥ पंचगव्यंवा पंचामृतंवा॥ ॐ सूर्य्याय·रक्तवितान·घृत रामः
शक्तुपायसंवा॥ ॐ सत्याय·सघृतगोधूमं॥ ॐ भृशाय·मत्स्यान्नं॥ ॐ आकाशाय·शष्कुलिशा ४

ज्ञजनाथ२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुनमासं॥ ॐ वायवे शुक्लम्॥ १ ॐ पृश्नये लाजा॥ २ ॐ वितथाय वराकोदनं॥ ३ ॐ गृहक्षताय मध्व
न्नं॥ ४ ॐ यमाय पिशितोदनं मांससहितभक्ष्यं वा॥ ५ ॐ गंधर्वाय गंधोदनं॥ ६ ॐ भृङ्गराजाय मे
षाजिह्वा शृङ्गं शकुनिजिह्वं वा॥ ७ ॐ मृगाय पावकं नीलपटलमिश्रकं यावकं यवचरु लाजावा॥ ८ ॐ
पित्र्यः कृशरान्नं कृशरमुद्गोदनं कृत्तपिष्टमाषंवा॥ ९ ॐ दौवारिकाय चन्द्रतापगृहकाष्ठं गंधपुष्पा
दियुक्तं॥ १० ॐ सुग्रीवाय पृषपावकंवा खर्परभक्ष्यो गोधूमधिकारः पूपाः॥ ११ ॐ पुष्पदन्ताय पायस
पक्वान्नं॥ १२ ॐ वरुणाय सकुशंकुशापंसहितहिरण्मयपिष्टं॥ १३ ॐ असुराय सुरां॥ १४ ॐ शोषाय घृतो
दनं॥ १५ ॐ पापाय यवपिष्टं गोधापक्वांवा॥ १६ ॐ रोगाय सघृतोलूखलं॥ १७ ॐ अहये पुष्पफलम
नागकेशरंवा॥ १८ ॐ मुख्याय घृतोदनं भक्ष्यंवा॥ १९ ॐ भल्लाटाय मुद्गोदनं॥ २० ॐ सोमाय सघृतं
पेश्वर मधुपायसंवा॥ २१ ॐ सर्पेभ्यः शालूकंपद्मकंदः शालिपिष्टंवा॥ २२ ॐ अदितये लोयिकाधाणी॥ २३ ॐ
दित्ये पूरिका॥ २४ ॐ अद्भ्यः क्षीरं॥ २५ ॐ सावित्राय समशीलूखलं॥ २६ ॐ जयाय सचंदनघृतं घृतोद

शकुशमोदनंचेत्यन्ने१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवा॥ ॐ हयग्रीवाय घृतपायसं गुणपायसंवा॥ ॐ भर्ग्गोय शर्करापायसं॥ ॐ सवित्रे गुणापूपं
॥ ॐ विवस्वते सरक्तचंदनघृतपायसं॥ ॐ विबुधाधिपाय सहिरालंघृतौदनं॥ ॐ मित्रा
य घृतौदनं॥ ॐ राजयक्ष्मणे आमपक्वमासं॥ ॐ पृथ्वीधराय छागमांसं॥ ॐ आपवत्साय दधि
॥ ॐ ब्रह्मणे पंचगव्यं यवतिलाक्षतघृतदधिनानाभक्ष्यंवा॥ श्यामलाभेपायससर्वेभ्यः॥ विष्वक्सेनाय
सभक्ष्यं॥ ॥ सोमगणेभ्यः॥ ॐ ईं चरवे मांसमक्तरुधिरं सघृतकमलपद्मकेसरंवा॥ ॐ आं विरार्यै
एणमांसमक्तरुधिरहरिद्राभक्तं॥ ॐ नैं भूतायै दधिसरुधिरास्थिरक्तपीतरक्तभक्तं॥ श्वा पा
राक्षसैः एणमांसमन्नयसुरासवाः॥ ॐ पूं रुद्राय सुरारुधिरं॥ ॐ अर्द्धमो आमपक्वमांसपीलुम॥
॥ ॐ रं भक्षाय मांसरुधिरं॥ ॐ धिलिमिलाय सारकपद्मं॥ ॐ कालेः सर्वत्रसर्वोपक्षेत्रपाल
वलिस्वात॥ ॐ ईं भीमकपालाय॥ ॐ भा त्रिपुरान्तकाय॥ ॐ ईं अग्निजिह्वास॥ ॐ कालि
काय॥ ॐ चंडसेनाय॥ ॐ चंडरायं॥ ॐ गंधमादनो॥ ॐ एकपादाय॥ श्यामश्वेतरक्त

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुष्पदीपसहितंबलिंदद्यात्॥ पूर्वहेतुकाय॥ अग्निवेतालाय॥ माहाकालाय॥ पृथ्वीधरा
य॥ स्यामलाभेविप्रश्चमाषभक्तेन॥ ॥ततः पूर्वेइंद्रायसवाहनायशचीशक्तिकामसायुधायनमः
इतिदशदिक्पालेभ्योदद्यात्॥ अग्नये॥ यमाय॥ निर्ऋतये॥ वरुणाय॥ वा
यवे॥ कुबेराय॥ ईशानाय॥ ब्रह्मणे॥ अनन्तायनमः॥ सम्पोषिऊ
र्वलिन्दद्यात्॥ ततः स्वर्गपातालमर्त्यचयेदेवावालुसंस्थिता॥ एहलमेबलिंहृत्वनष्टायान्तुक्षमंसिरं॥
१॥ भूतवेतालयेचान्येयेचान्येबलिकांक्षिणाः॥ विघ्नोपसर्गशयेचतेपिगृह्णन्त्वमंबलिम्॥२॥ इतिबलि
दानम्॥ ॥एवंदानेनपुराणहवाचनमात्पूजाम्रुत्विक्मात्रानिक्रत्वा कुंडमंडपंकृत्वा लक्ष्मीनारायण
वल्लभशिवाच्युतहर्म्यधृतिमांस्थापनेकृत्वावरुणकलशंप्रतिष्ठाप्य सर्वेषांपूजनहोमंकृत्वा ततोवास्तुपू
जयेत्॥ ॥महाकौलपंचरात्रे॥ ॥मस्तकेसंस्थितोरुद्रःकर्णयोर्लक्ष्यसंस्थितौ॥ पर्जन्यश्चक्षितिश्चैवन
खेचापसुसंस्थितः॥१॥ आपवत्सःस्थितःकंठेजयन्तश्चादितिःपुनः॥ कंधयोर्वह्निसाधाम्नमहेन्द्राश्चभुजे
द्वये॥२॥ वसस्थोहृदसावित्रोरासत्रुसवितातथा॥ हस्तोसुहृत्तोतस्यवल्लभानोयवस्थितः॥३॥ पृथ्वीध

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रोमरीचिश्चलनयोःकुक्षिगोधुनः॥विवस्वान्मित्रनामाचपार्श्वयोःपितरस्थितः॥४॥पापाद्याश्चैवपृषाद्याः
सप्तसप्तेहजंघके॥इन्द्रोमेढ्रेस्थितस्तस्यजयाद्वृषणासंस्थितः॥५॥ ॥अथसूक्तानि॥ ॥कस्यनूनम
मित्यस्यपंचर्चस्याष्टमस्यसूक्तस्याजीगर्तिर्ऋषिः॥भगःस्वस्तिर्ऋषिरसावेवंवेधामित्रोदेवतातृतीयोक्तो
वरुणोदेवताआकाक्ष्याद्वितीयामाग्नेयीचतस्तीयाद्यालिङ्गोक्तदेवताचत्रिष्टुप्छन्दः॥तृ
तीयाद्यालिङ्गोक्तायत्रः विहितार्थेविनियोगः॥कस्यनूनंकतमस्यामृतानांमनामहेचारुदेवस्यनाम
॥कोनस्तोमहितीयेपुनर्दतिवरंचदक्षायमाणंचः॥२॥अभित्यंदेवसवितारमोण्योःकविक्रतुमर्चामसुम्न
मीमहे॥यश्चिद्धिसत्यसवाममानःपुरानिदःअंहोश्चिदग्नेयाद्वधे॥४॥भगभक्तस्यतेवयमुदशे
मतवावसा॥मूर्धानंरायआरभे॥५॥नहितेक्षत्रंनसहोनमन्युंवयश्चनामीयतयेतभायुः॥नेमाआपो
अनिमिषंचरन्तीर्नयेवानस्पप्रमिनन्त्यभ्वं॥६॥अवद्युतानोवरुणोवनस्योरुंसुस्तेपृनरक्षाः॥नोवी
नास्पूरुपरिधूरसामसमंतानेहिताकेतवःस्युः॥७॥अहंहिराजावरुणश्चकार्सूर्यायपंथामन्वे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तवाऽ॥अपदेपाशाप्रतिधातवेकरुतापवस्वाहृद्याविधश्चित॥८॥शतन्नेराजाभिषजःकरुत्सम्वीगमिणासु
मतिष्टेअस्तु॥बाधस्वदूरेनिर्ऋतिंपराचैःकृतंचिदेनप्रमुमुग्ध्यस्मत॥९॥अमीयऋक्षानिहितासउच्चान
क्रूंरदृतेकुहचिद्देवेयुः॥अरुध्यानिवरुणास्यव्रतानिविचाकशच्चदमांमकमेति॥१०॥तत्वायामिव्र
तरणावसमानतदाशास्तेयजमानोहविर्भिःअहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥११॥तदिन
क्रतंसचामसमाहःतस्यकेतोहरआविवष्टे॥भनःशेपोयमहमृणीत॥सोअमेमान्नाजावरुणोमुमोक्तु॥
१४॥भनःशेपोह्वमृणीतत्रिष्वादित्यंपदेषुवद्धं॥अवैनंराजावरुणःसस्रज्याहिह्यभरध्वंविमुमोक्तु
पाशात॥१३॥अवतेहेडोवरुणनमोभियंहविर्भिरीमहेहविर्भिः॥क्षयंनस्मम्रमरुतःसुचेतासिश्रि
थंकृतानि॥१४॥उदुत्तमंवरुणपाशमस्दवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानाग
सोअदितयेस्याम॥१५॥ ॥अथपावमानस्तृचम्॥पवमानःसुवर्जनः
तिसप्तरशर्चस्यस्यानुवाकस्यसोमऋषिर्लिङ्गोक्तादेवताःपावमान्योवादेवताआद्येगायत्रीतृतीयाऽनुष्टुप्तुर्थीप
चम्योगायत्र्योनवतोद्वित्रिष्टुभोऽष्टमीगायत्रीनवतोष्टावनुष्टुभःसप्तदशीत्रिष्टुप्अभिषेकेविनियोगः॥ॐपवमा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

SC-0. Digitized by eGangotri and MoE, Delhi.

नःसुवर्नेनःपवित्रेणविश्वर्षणिः॥सपोतासपुनातुमा॥१॥पुनन्तुमादेवजनाःपुनन्तुमनवोधिया॥पुनन्तुवि
श्वन्नवयः॥२॥जातवेदःपवित्रमर्चिषाश्रोवितन्तमतया॥ब्रह्मतेनपुनीमहे॥३॥उभाभ्यांदेवसवितःप
वित्रेणसवेनच॥इदुवसपुनीमहे॥४॥वेष्णवेत्वपुनतीदेवायागायत्वाहोलनुवोवीतएषः॥तयामदं
नःसधमादेषुवयंस्याम्पतयोरयीणाम्॥६॥वेष्णवोरश्मिभिर्कृतावीयोजियेमाप्नीतमा॥७॥बृहद्भिः
सवितस्त्वेवाजेभिर्देवजमभिः॥अग्नेदक्षैःपुनीहिमा॥८॥येनदेवाअपुनन्नयेनायोदिवंकपः॥तेनदि
येनवल्लोदंवलमपुनीमहे॥९॥यःपावमानीरध्येतिऋषिभिःसम्भृतंरसंसर्वासपूतमश्नातिस्वदितंमातरि
श्वनः॥१०॥पवमानीयोअध्येतिऋषिभिःसम्भृतंरसम्॥तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधुक्रम्॥११॥
पवमानीःस्वस्त्ययनीःसुदुघाहिपवश्वतीऋषिभिःसम्भृतोरसोब्राह्मणेष्वमृतंहितम्॥१२॥पावमानीर्हि
तेनइमंलोकमथोअमुम्॥कामान्त्समर्धयतुनोदेवीर्देवैःसमागतः॥१३॥पावमानीःसुदुघाहोघृत
श्चुतः॥ऋषिभिःसम्भृतोरसोब्राह्मणेष्वमृतंहितम्॥१४॥येनदेवापवित्रेणात्मानंपुनतेसदा॥तेन
सहस्रधारेणपावमान्यःपुनन्तुमा॥१५॥प्राजापत्यंपवित्रंशतोद्यामिरण्मयम्॥तेनब्रह्मविदःपूतंब्रह्मपू

Jagannath Bhattarai Collection. Nayarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नीमहे ॥१६॥ इंद्रः सुनीतिसहमोजनातुसोमः स्वस्त्यावरुणः शमीच्यो ॥ यमोराजासुप्रयणाभिःपनातुमांजातवेद
मृजयत्मापनातु ॥१७॥ ततःखसावोक्रेन्येपिमंत्रेभिषिक्तःश्रोतावासनणाशिवोगहोत्वातास्रणाम्याकलशज
लंपिबेत ॥ इतिपावमानीस्तम् ॥ ॥ जागरश्रीघ्रस्तम् ॥ ॥ रक्षोहणंपितपवित्रंशत्रवस्य आंगिरसेयायु
नारक्षमाग्नेयंत्रेष्टुभंचतुरुष्टुभंते ॐ हरिः ॥ रक्षोहणोवाजिनमाजिघर्मिमित्रंप्रतिस्तमपयाशर्म्मशिशा
नोऽग्निःक्रतुभिःसमिद्धः ॥ सनाद्दिवामरिषः पातुनक्तं ॥१॥ अयोदंष्ट्रोअर्चिषायातुधानानुपस्पृशजात
वेदःसमिद्धः ॥ आजिहयामूरदेवान्त्रभव्यक्रव्यादंत्रुप्रधक्ष्यासन् ॥२॥ उभोभयाविन्नुपधेष्टनातिरिक्षेप
रिधेहिःराजंनमेसधेस्थमियातुधानान् ॥३॥ यन्नेरिष्टःसंतनमानोअग्नेवाचाशल्यांम्रशनिमिर्दिहानः
तमभिर्विध्यहृदयेयातुधानम्प्रतिस्रोवाहंप्रतिमंध्येषाम् ॥४॥ अग्नेत्वयातुधानत्यमिंचिरंतासंनिहरसाहत्वेनंप्र
पर्वोशिजातवेदःशृणीहि ॥ क्रव्याक्रविंविचिनोतुवरुणम् ॥५॥ यत्रेदानींपरुषंनानवेरलिष्टंत्मग्नउतवावृ
तम् ॥ यद्वातरिक्षेपथिभिःपतंतंतमस्तावित्सर्वोसिशानः ॥६॥ उन्नालभेंशृणहीजातवेदआलेभानाहरि
भिर्यातुधानान् अग्नेपूर्वोनिजहिशोशुचानआमारुस्त्विकातमदत्वेनीः ॥७॥ हरप्रबुद्धियतमःसाअग्नेयोयातु

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धातुधानोयमृक्कणोमि॥तयाभ्रघ्नन्नमीवायविष्टचक्षसम्पत्सरंपश्येनम॥८॥तीक्ष्णोनातेचक्षुषारक्षयं
रेप्राञ्चंवसुभ्यःप्रवेतम॥हिंसंरक्षांस्यभिशोशुवानेमात्वाहभ्यातुधानानेचक्षः॥९॥नचक्षारक्षःपरि
पदपत्तविक्षुतस्यत्रीणिप्रनिसहीतस्यात्रेपृथीहरसाभृणीहित्रेधाम्लेयातुधानसहस्र॥१०॥
चियाधानःप्रसितिन्नयन्तेयोअग्नेभन्तेनहंतिनमर्चियास्फुर्जयज्ञातवेदःसमक्षेनंगृणातोनिनद्ध
धि॥११॥नदस्रेचक्षुःप्रतिधेहिमेहरक्षाहनंयेनपश्यसि॥यातुधानमथर्ववज्जातियोदेवेनसत्पधर्तेतमाचितंमो
ष॥१२॥यदग्नेअद्यमिथनाशपातोयद्वाचस्तृष्टजनयंतेरफाः॥मन्योमेनसःशव्याअजायंतेयातयाविध्र
हृदयेयातुधानाम॥१३॥पराभृणीहितपसायातुधानापरागेरक्षोहसाभृणी॥परार्चिषामूरदेवाभृ
णीहिपरासुतृपोअभिशोशुवानः॥१४॥परात्रदेवाह्रजिनंभृणांप्रत्यक्षेनंयथायत्नुहाः॥वाचालेनंश
र्वसस्पतेमेविखस्येतुप्रसितिंयातुधानाः॥१५॥यःपौरुषेयेणक्रविषासमंक्तेयोअश्वेनपश्वनायातु
धानः॥योअघ्न्यायाभरतीक्षीरमग्नेतेजांसीवीर्यांहरसापिहस्व॥१६॥संवत्क्रीणांपयउस्रियायास्तस्य
मासीयातुधानोनचक्षः॥पीयूषमग्नेयतमस्तितृप्सन्तंप्रत्यङ्मर्चिषाविध्यमर्मन॥१७॥विषंगवांयातु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यानाः पिबंत्वाज्यश्चन्नामदितेयेदुरेवाः॥ परैनोदेवः सविताददातुपरामागमोषधीनांनयन्नाम॥१८॥सनारुद्रेभृ
गुसियातुधानान्नत्वाक्षांसिपृतनासुजिग्युः॥ अनुरुद्रंसहसूरोऋवासोमातेहव्यमुश्मतदेव्यायाः॥१९॥त
नोअग्नेअधरादरक्षात्वपश्चादुतरक्षापुरस्तात्॥ घनिनेनेअजरासमिष्टाअघस्रंसोभ्यवतोरहंतु॥२०॥
पश्चात्पुरस्तादकविःकायेनपरिवाहिरानन॥ सखेसखायमजरोजरिम्णेममस्त्वग्नः॥२१॥परित्वाग्नेपुरंवयं
विप्रंसहस्यधीमहि॥ धृषद्वर्णंदिवेदिवेहंतारंभंगुरावतां॥२२॥विश्वेषांभंगुरावतःप्रतिष्मरक्षसोरुहः॥
अग्नेतिग्मेनशोचिषापुरःशोशुचदाविभिः॥२३॥प्रत्यग्नेमिथुनादृह्यातुधानाकिमीदिना॥ संत्वाशिशामिज्ञा
गल्लदध्वंविपमन्नभिः॥२४॥प्रत्यग्नेरक्षसोवलंविहरुजवीर्यम्॥ यातुधानस्यरक्षसोवलंविहरुजवीर्यम्
॥२५॥शतिरक्षोघ्रस्कम्॥ ॥अथयज्ञहयोगशांतामिषेकः॥अथस्विष्टकृतंहुत्वाहोमंसमापयेत्॥ ॥भद्रास
नोपविश्यस्ययज्ञमानस्यऋत्विजेः॥ कलशोदकेनैवअभिषेकंसमाचरेत्॥ त्रियंबकेनमंत्रेणक्षत्रस्यपतिना
अपि॥ अनश्वंद्रुयेनैवलोकपालाष्टकेरपि॥ सुराज्ञातिमंत्रेणायेनदेवाश्चयःक्रमात्॥ अन्येचपुराणसूक्त्य
अभिषेकंसमाचरेत्॥ अभिषेक्यास्नुतवस्त्रेआचार्योयंनिवेदयेत्॥ ॥ॐजातवेदसेसुनवामसोममरातियतो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निदहा॥१॥तामग्निवर्णांतपसाज्वलंतीवैरोचनींकर्म्मफलेषुजुष्टांदुर्गांदेवींशरणामहंप्रपद्येसुतरसिनस्सेनमः॥२
॥अग्नेत्वंपारयानव्योअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वाः॥पूश्चपृथ्विबहुलानउर्वीभवातोकायतनयायशं
योः॥३॥विश्वानिनोदुर्गहाजातवेदः॥सिंधुन्नावादुरितात्यग्ने॥अग्नेअत्रिवन्मनसागृणानोस्माकंबोध
विताततनूनां॥४॥पृतनाजितंसहमानमुग्रमग्निंहुवेमपरमात्सधस्थात्॥सनःपर्षदतिदुर्गाणिविश्वा
क्षामद्देवोअतिदुरितात्यग्निः॥५॥पत्नीवंतंयजत्रंवेत्तेनोरास्यपावकमीमहेसख्यायवेतां॥अधीरजुसनाच्छोचनाच्चस्वस्त
श्चि॥खांवाग्नेतनंप्रियखास्यंधंसोभगमायजस्व॥६॥गोभिर्जुष्टमयुजोनिषिक्तंतवेन्द्रविष्णोरनुसं
चरेम॥नाकस्यपृष्ठमभिसंवसानोवैष्णवींलोकइहमादयंताम्॥७॥इतिजातवेदसेऽनुवाकः॥॥यतदृक्षुम
मामहेतनोग्नेःअमयंकृधिमघवद्भ्योनस्तनूभ्योविदेहियोविश्वधोजहि॥तंत्वावयंमघवन्दुर्गहंवे
णाःसुतावंतोहवामहे॥त्वंहिराधस्पतेराधसोमहःक्षयंसासिविधतः॥२॥॥क्षेत्रस्यपतिनावयंहितेनेव
जयामसिगध्यंयोधयिन्वा॥गामश्वंपोषयित्न्वा॥मनोमहानिदुश्रेक्षेत्रस्यपतेमधुमन्तमूर्मिम॥धेनुरिवयोअस्मासुधुक्षेमधु
श्चुतंघृतमिवसुपूतमृतस्यनपतयोमदन्तु॥अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्॥१॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नयोधस्मञ्जुहुराणामेनोभयिष्ठान्नेनमःअक्किविधेमभारेवानामयिपंथामगन्नयञ्छ्रवामत
दनुपवोढुं॥अग्निर्विद्वान्त्समयन्त्सेदुहोत्रेसोध्वरान्त्सरुतोकल्पयाति॥यद्वाहिष्ठान्नरन्त्यग्नेहर
वैविभावसो॥महिषीवत्वज्रयिरित्तेद्वाजाउदीरते॥अग्नत्वेपारयान्त्योअस्मान्त्स्वस्तिभिरतिदुर्गा
णिविश्वा॥योन्त्सपृथ्वीदृक्षानउर्वीभवातोकायातनयायसंयोः॥त्वमग्नेव्रतपाअसिदेवआमर्त्ये
ष्वा॥त्वेयज्ञेसीदन्तः॥यद्वोवयंप्रमिनामव्रतानिविदुष्टान्देवाअविदुष्टासः॥अग्निष्टद्विश्वमाप
णातिविद्वान्नेमिद्देवाँऽऋतुभिःकल्पयाति॥१॥ ॥इत्यग्निषेकमन्त्राः॥ ॥इतिगरुत्वातुविधिः
समाप्तः॥शुभमस्तुभूयात्॥शिवंतमिदंपुस्तकंहेमलालशर्म्मणः॥ ॥ ॥※॥ ॥※॥ ॥

Jagannath Bhattarai Collection, Nagarjun-7; Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi